# भास्वती भारती

## संस्कृत ई-पत्रिका

2018-19



indian schools,
sultanate of oman

## निर्देशकानां मण्डलम्

भारतीय विद्यालया:
ओमानदेश:

For Private Ciruclation only

# स्वीकृति:

प्रिय सविधे ! नमो नम: |

‘भास्वती भारती’ इतीयं वार्षिकी पत्रिका ओमानदेशस्य भारतीयविद्यालयानां निर्देशकमण्डलेन प्रकाशमाना भवति | इयमेव प्रथमा सञ्चिका | भारतीयविद्यालयानां संस्कृतच्छात्रै: लिखिता: नाना विषया: अत्र संकलिता: | पत्रिकेयं छात्राणां प्रोत्साहनाय एव नूनं भविष्यतीत्यत्र न कोऽपि सन्देह: | अस्यां पत्रिकायां छात्राणां विषयज्ञानं, कौशलं, संस्कृतभाषाज्ञानञ्च सम्यक् प्रतिपाद्यन्ते | अनेन संस्कृतभाषायां छात्राणाम् अभिरुचि: वर्धिष्यते इत्यत्र द्वितीयाभिप्राय: न भविष्यति | अस्यां पत्रिकायां कविता:, राष्ट्रीयविषया:, साहित्यविषया:, वार्तालाप:, पर्यावरणम् इति भारतीयविद्यालयानां छात्रा: विविधेषु विषयेषु लिखित्वा स्वकौशलं प्रदर्शितवन्त: | एतेषां कौशलं प्रशंसनीयमेव | आगामि संवत्सरेषु इतोऽपि अधिकारा भविष्यतीति आशास्महे | यदा छात्राणां कौशलं प्रशंसाम: तदा तेषां छात्राणाम् अध्यापका: अपि प्रशंशनीया: | सर्वेषां सहायेन उत्तमरीत्या प्रकाश्यते इयं पत्रिका वर्धताम् अभिवर्धतामिति प्रार्थयामहे ||

**डा.गोविन्दराज: (ISD)**
**संस्कृताध्यापक:,**
**भारतीयविद्यालय: दार्सैट्**
**सम्पादक:**

**डा. नारायण: (ISG)**
**अध्यक्ष:, संस्कृतविभाग:,**
**भारतीयविद्यालय: अलघुब्रा**
**उप-संपादक:**



# विषयसूची

१) मम परिचय:
२) मम मित्रम्
३) नित्यध्यानम्
४) मम प्रियं पुस्तकं - रामायणम्
५) मम विद्यालय: (कविता)
६) मम विद्यालय:
७) शुभ दीपावलि:
८) राजभवनम्
९) अस्माकं कर्तव्यम्
१०) हृदय विशेषज्ञा
११) पर्यावरण प्रदूषणम्
१२) अभिगट्यानि
१३) मम गृहम्
१४) सुविचार:
१५) समाज सेवका:
१६) प्रश्नोत्तराणि
१७) परोपकार: पुण्यम्
१८) प्रहेलिका
१९) मातृभूमि:
२०) चतुरङ्गाक्षर क्रीडा
२१) जयतु संस्कृतं जयतु भारतम्
२२) वार्तालाप: - मित्राणि
२३) मम देश:
२४) पिपीलिकाया: कथा



२५) मातापितरौ सेवा

२६) मित्राणि

२७) साधव: सर्वे सफला: भवन्ति

२८) आचार्यदेवो भव

२९) मम विद्यालय:

३०) मम प्रिय भारतीय नेता - गान्धीजी



३१) मम धन्या माता

३२) चरक:

३३) महाभारतम्

३४) मम प्रियं पुस्तकम् - हारी पाठर्

३५) कालिदास:

३६) सीता

३७) संस्कृत व्याकरण पिता - पाणिनि:

३८) जटायु:

३९) भरतमुनि:

४०) गङ्गानदी

४१) महाकवि: भास:

४२) वृक्षा: अस्माकं मित्राणि

४३) पुष्पाणि

४४) संस्कृताध्यापक:

४५) वृक्षा: - अमूल्यं सम्पत्

४६) तरव:

४७) मम प्रिय: खग: - मयूर:

४८) नीलग्रह:

४९) सुवचनानि

५०) मम परिचय:

५१) सङ्गणकानि



# अध्यक्षाणां सन्देशः



Dear All,

India is a land of diversity. Like our motherland, the Indian Schools in Oman too is a beautiful mixture of cultures, languages and ideas. As children grow, especially in cities with limited interpersonal interaction, they need outlets for mental stimulation and creativity to learn and develop critical skills such as social learning.

As the Board of Directors of Indian Schools in Oman, we strive to ensure that our children receive every opportunity possible to develop, enhance & showcase their skills. Our ultimate vision and aim, captured by Vision 2020, is to ensure that every child from our schools will undergo transformative learning and be equipped with the knowledge, skills and well-being to find their identity and purpose in life.

It is thus in this light that we are launching annual E-magazines in various languages like English, Hindi, Malayalam, French, Sanskrit and Arabic to promote a love for the written word among our children.

As social animals, communication is at the heart of human experience. While other animals too signal and convey messages in some form or the other, what differentiates the human species is our ability to respond rather than react to immediate stimuli. Our ability to think & express our abstract thoughts. Our creativity in continually improving our languages. For humans, language is a cultural phenomenon that is more than just innate biology.

We hope this e-magazine

- enlightens and educates
- inspires you to express your thoughts &
- sparks a love for the language

It is thus with great pleasure that we welcome you, dear reader to the first edition of the Indian School e-magazines - a collection of stories, poems & articles written by our children & curated and edited by our school resources.

Here's the first edition, dedicated to all the amazing people who have made this magazine a reality.

So, read on, ponder and participate.

With Love,

**Dr. Baby Sam Saamuel**

**Chairman, Board of Directors**





# शैक्षिक-मन्त्रदातो: सन्देश:

*The Language magazine is yet another new initiative of the Board of Directors of Indian Schools in Oman. This novel idea of having magazines in different languages aims to encourage creative writing among the student community in the language of their interest. Through creative writing children can express their innovative ideas, emotions, thoughts etc. It helps not only in enhancing their imaginations and writing skill but also provide a platform for expressing emotions, especially for those who are hesitant to do it otherwise.*

*On behalf of the Board of Directors, I would like to place on record our sincere thanks to all language teachers for their invaluable support in making this dream a reality.*

*Our appreciation to all the young writers, who have contributed their writings to this magazine and we wish them best to become well-known writers of tomorrow.*

*As it is said, every long journey begins with a single step; I hope this initiative will create a lot of creative writers in days to come.*

*M.P. Vinoba*

*Education Advisor*

# संपादकमण्डलम्



**संपादकमण्डलम्** - (पुरत:) अखिलेश: कुमरवेल् (VIII), मनस्विनी प्रवीण: (VII), तारीश: प्रभाकर: (VII) (पृष्ठत:) श्रीवत्सराज: (IX), मुरारिराज: (X), मगन्धा दिनेश: (VIII), डा. गोविन्दराज: (संपादक:), राज: रावत् (IX), अभिनव: रघु (IX) (प्रमुखपृष्ठपरिकल्पना Cover page design - मुरारिराज:)

**संस्कृताध्यापकमण्डलम्** - ISG - डा.नारायण: (उप-संपादक:), श्रीमती राधामनिकुमार:, श्री.भरतराम:, श्रीमती ज्योति:, ISGi - श्रीमती गायत्री, ISWK - श्री. सुरेश:, ISM - श्रीमती मधुपटवारी, श्रीमती विज्ञा, ISAM - श्रीमती मञ्जुश्री:, श्रीमती नित्या, ISAS श्रीमती बिन्दुमोल्, ISN - डा. विष्णु: परमेश्वर:, ISS - श्रीमती कविता, कु. अल्पा

## धन्यवाद



- अध्यक्ष:, निर्देशकमण्डलम्, भारतीयविद्यालया:, ओमानदेश:
- सर्वे निर्देशका:, निर्देशकमण्डलम्, भारतीयविद्यालया:, ओमानदेश:
- शैक्षिकमन्त्रदाता, निर्देशकमण्डलम्, भारतीयविद्यालया:, ओमानदेश:
- शिक्षाधिकारी, निर्देशकमण्डलम्, भारतीयविद्यालया:, ओमानदेश:
- सर्वे प्राध्यापका:, भारतीयविद्यालया:, ओमानदेश:



## मम परिचय:

मम नाम अनौष्का | मम जनकस्य नाम अनीश: |

मम जनन्या: नाम बिजुला | मम गृहं घुब्रा प्रदेशे अस्ति |

मम गृहे चत्वार: जना: सन्ति |

मम मित्रस्य नाम लक्ष्मी:|

अहम् अल्घुब्रा भारतीयविद्यालये पठामि |



अनौष्का अनीश:, अष्टमी कक्षा

भारतीय विद्यालय: अल्घुब्रा

## मम मित्रम्



मम नाम गोकुल: अस्ति | मम प्रियं मित्रं श्याम: अस्ति | स: मस्कतनगरे वसति | मम मित्रं भारतदेशे केरलराज्ये निवसति | स: मम कक्षायां पठति | स्याम: अतिकुशाग्रबुद्धि: च अस्ति | स: मधुराभाषी अस्ति | अतीव चतुर: अपि अस्ति | विद्यालये आवां मिलित्वा एव भोजनं कुर्व: | स: सर्वदा स्वच्छवस्त्रं धारयति | श्याम: कदापि समयं न यापयति | स: मम अध्ययने सर्वदा सहायं करोति | स: परीक्षायां सर्वदा प्रथमं स्थानं प्राप्नोति | स: गृहे समाजे तथा च यत्र कुत्रापि गच्छति तत्र स्नेहं, संमानं च प्राप्नोति | श्याम: मम प्रियं मित्रम् अस्ति |



**गोकुल सतीश:, सप्तमी कक्षा, भारतीय विद्यालय: अल् माबेला**

# नित्यं ध्यानम्



सत्यम् एव ध्यायामि नित्यम् | सर्वं शोकं नाशं भवति |

सत्यं नित्यं जयति तेन दु:खं नश्यति |

सदा सत्यं वदति सुखं सौख्यं

सर्वत्र तस्य भवति |

तस्य चित्तम् आनन्दम् अनुभवति |

आयुष् महेश: नायर:, नवमी कक्षा,

भारतीय विद्यालय: अल्घुब्रा



# मम प्रियं पुस्तकम् - रामायणम्

मम प्रियं पुस्तकं रामायणम् अस्ति | रामायणम् एकं विशालं पुस्तकम् अस्ति | रामायणे

रामस्य सीताया: च जीवनम् वर्णितम् अस्ति |



रामायणस्य रचयिता महर्षि: वाल्मीकि: अस्ति |

अस्य काव्यस्य कथा अयोध्यायाम् आरभ्य अस्ति |

रावण: सीताम् अपहरति ; राम: रावणं मारयित्वा सीतां पुन: आप्नोति

राम: विष्णो: अवतार: इति वाल्मीकि: रचयति |

रामायणम् संस्कृतसाहित्यस्य उत्तमं पुस्तकम् अस्ति |

हरिचन्दन:, सप्तमी कक्षा

भारतीयविद्यालय: दार्सैट्





## मम विद्यालय: |

मम विद्यालय: मम विद्यालय:
भारतीय विद्यालय: अल् सीब् |
मिलित्वा पठन्ति सर्वे छात्रा: अत्र
सर्वान् आचार्यान् नमाम्यहम् ||
मम विद्यालय: मम विद्यालय:
उत्तमविद्यालय: मम विद्यालय:
उत्तम क्रीडाक्षेत्रम् उत्तमा वाटिका च
अलङ्करोति मम विद्यालयम् ||




मधुमिता - पञ्चमी कक्षा
भारतीय विद्यालय: अल् सीब्



## मम विद्यालय:



मम विद्यालयस्य नाम भारतीय विद्यालय: अल् माबेला इति अस्ति | मम विद्यालयस्य त्रय: अट्टा: भवन्ति | मम विद्यालय: विशाल: अस्ति | मम विद्यालये त्रिसहस्राधिका: छात्रा: पठन्ति | मम विद्यालय: प्रात: सप्तवादनत: मध्याह्ने द्विवादनपर्यन्तं भवति | मम विद्यालये निपुणा: शिक्षका: शिक्षिकाश्च पाठयन्ति | मम विद्यालये विशालं क्रीडाङ्गणं अस्ति यत्र क्रीडाकलांशे छात्रा: क्रीडन्ति | मम विद्यालये विशाल: पुस्तकालय:, सुसज्जा प्रयोगशाला, विशाल: संगणककक्ष: च अस्ति | वयं छात्रा: अत्र नृत्तं गीतं च पठाम: | छात्रा: अत्र क्रीडाप्रशिक्षणं प्राप्नुवन्ति | सर्वे छात्रा: अनुशासनं पालयन्ति | अहं मम विद्यालयं बहु इच्छामि |




**प्राथना पी एम, सप्तमी कक्षा भारतीय विद्यालय: अल् माबेला**

<u>शुभ दीपावली</u>

उत्साहस्य चैतन्यस्य प्रकाशस्य च पर्व दीपावली | दीपानाम् आवलि: दीपावलि: इति कथ्यते | भारतीयसंस्कृति: उत्सवनां माला अस्ति | तस्यां मालायांदीपावली इति मुख्यं पुष्पम् अस्ति | हिन्दूनाम् अयं मुख्यं पर्व न केवलं भारतदेशे आचरन्ति अपि तु जगति यत्र कुत्रापि भारतीया: निवसन्ति तत्रापि आचरन्ति | एतस्मिन् पर्वणि जना: गृहं स्वच्छं कुर्वन्ति | प्रात: शीघ्रं उत्थाय सुवासिकं लेप्यं लेपयित्वा स्नानं कुर्वन्ति | नूतनानि वस्त्राणि वस्तूनि च क्रीणन्ति | गृहिण्य: मुखद्वारे वर्णयुक्तरङ्गावलीं रचयन्ति | मृत्तिकाया: दीपेषु तैलं वर्तिकां च संस्थाप्य ज्वालयन्ति च | ग्रहस्य महिला: लावण्ययुक्तं शर्करायुक्तं च विविधानि रुचिकराणि खाद्यानि निर्मान्ति जना: आस्वादयन्ति च | धान्यकरण्डकानां पूजां कुर्वन्ति | लक्ष्मीदेव्या: पूजनं कुर्वन्ति | जना: गोवर्धनं पूजयन्ति | भ्रातृभगिन्यो: संबन्धं दृढं करोति यमद्वितीया पर्व | बाला: युवका: च विस्फोटकान् ज्वालयन्ति | अनेन क्रमेण जना: दीपावली-पर्वण: आचरणं कुर्वन्ति | अयं दीपावली-पर्व समेषां जीवनं प्रकाशमयं करोतु इति मङ्गलकामना|



**पुष्पाश्री: रामगोपाल, सप्तमी कक्षा भारतीयविद्यालय: अल् माबेला**



## <u>राजभवनम्</u>

इदं सुन्दरं राजभवनम् अस्ति | तत्र देशस्य राजा स्वपरिवारेण वसति | तत्र अश्वा: गजा: रथा: च भवन्ति | वीरा: भवनस्य रक्षां कुर्वन्ति | राज भवनम् अतीव सुन्दरं भवति | राजभवनं परित: उद्यानानि सन्ति | तत्र उद्याने बालका: क्रीडन्ति | उद्याने वृक्षा: सन्ति | वृक्षेषु फलानि, पुष्पाणि च भवन्ति | पुष्पाणि सुन्दराणि मनोहराणि च सन्ति | वृक्षेषु खगा: वसन्ति | ते मधुरं कूजन्ति |



प्रथमेश:, षष्टी कक्षा,

भारतीयविद्यालय:



## अस्माकं कर्त्तव्यम्

अद्य जनाः भूमेः प्रति कर्त्तव्यम् विस्मरन्ति इयं ससारं प्रदूषितं कुर्वन्ति



अवकरं च यत्रकुत्रापि एवं च सरोवरे अपि क्षिपन्ति सरोवरस्य जीवाः पञ्चतन्त्रम् गच्छन्ति।

सरोवरस्य जलं अपि अनुपयोगः भवति। विविधाः विहगाः जलचराः अपि नश्यन्ति ।

विषाक्तं जलं सरोवरे समुद्रे गच्छति तत्रापि भयंकरं विनाशं करोति।

अतैव अस्माकम् सर्वेषाम् कर्त्तव्यम् यत् किञ्चित् कृत्वा अस्य संसारं रक्षेम।

अजिता अर्विन्त  कक्षा नवमी

भारतीय विद्यालयः मस्कत्

## हृदय विशेषज्ञा

हृदय-रोगेण पीडितानां कृते हृदयस्य स्वास्थ्याय प्रथमतया व्यायामस्य शिक्षणं ददाति।

मिताहार सेवनाय अपि निर्बध्नाति।

यदा तीव्र क्षुधां अनुभवन्ति

तदा एव भोजनं कर्तुं समर्थयति।

एवं स्वास्थ्य रक्षणं कुर्मः।

तथापि ये भृशं अस्वस्थाः तेभ्यः औषधं ददाति

आवश्यकतानुसारं शल्यचिकित्सां अपि करोति।




रेया अत्री **षष्ठी कक्षा**

भारतीय विद्यालयः अल् घुब्रा (अन्ताराष्ट्रियः)



## पर्यावरण प्रदूषणम्



अखिलविश्वे मानवसभ्यतायाः समक्षं बहूनि प्रदूषण प्रभावाः सन्ति।

अस्मिन् पर्यावरण प्रदूषणम् मुख्यं भवति। जल वायु अन्नादिकेषु अपि प्रदूषणं भवति।



अस्य प्रभावात् रोगादीनां समस्या भविष्यति।

एतत् निवारणार्थं वयं सर्वे जागरूकाः भवेयुः।

प्रथमतया अस्माकं गृहं अस्य परिसरः च शुचीकरणं कृत्वा

अन्यान् अपि प्रेरयामः।

शुचिर्मयं भारतम् भवेत् इति अस्माकं लक्ष्यम्।

तदर्थं सर्वकाराः अपि जागरूकाः भवेयुः इति मम प्रार्थना।

रूपेश्वर् एम् ए– अष्टमी कक्षा

भारतीय विद्यालयः अल् सीब्





## अभिगट्यानि (Plastic)

अभिगट्यानि हानिकराणि सन्ति। तानि भूमेः नाशं कुर्वन्ति।

बहूनि वस्तूनि इदानीम् अभिगट्येन निर्मितानि सन्ति।

तानि न उपयोक्तव्यानि। एतानि प्रकृतिं नाशयन्ति।

बहुशः लोहपात्राणि एव उपयोक्तव्यानि।

मार्गे अभिगट्यवस्तूनां क्षेपणं मा कुरुत॥



शरण्या सौपर्णिका च, षष्ठी कक्षा

भारतीयविद्यालयः - दार्सैट्



# मम गृहम्

मम गृहम् ओमानदेशस्य मस्कतनगरे अस्ति। मम गृहे चत्वार: जना: सन्ति। मम माता पिता अनुज: अहं च। मम गृहे पंच प्रकोष्ठा: सन्ति। अत्र अहं मम कुटुम्बेन सह विविधं कार्यं करोमि। मम गृहे एका पाकशाला अपि अस्ति। अत्र मम माता विविधानि व्यंजनानि पचति। मम गृहे एक: आवासकक्ष: अस्ति अत्र वयं मिलित्वा दूरदर्शनं पश्याम:। मम गृहे द्वौ विश्रामप्रकोष्ठौ स्त: यत्र वयं विश्रामं कुर्म:। मम गृहे एक: आलिन्द: अपि अस्ति यत्र अहं सायंकाले आसन्दे उपविशामि तथा सायंकालस्य सुरम्यं दृश्यं पश्यामि। मम गृहे एका सुरम्या वाटिका अपि अस्ति। अत्र अहं मम सख्या सह क्रीडामि। वाटिकायां उन्नता: वृक्षा: पुष्पलता: च सन्ति। मम गृहस्य



वातावरणम् आनंदमयम् अस्ति अत: मम अतिप्रियम् अस्ति।

भारते अपि मम एकं गृहम् अस्ति। तत्र मम पितामह: पितामही च वसति। मम गृहे धेनु: अस्ति। तत्र एकं कृष्णमन्दिरम् उद्यानं च अस्ति। भारतस्य गृहमपि अहम् इच्छामि।

**श्रावणी कालशेट्टी, सप्तमी कक्षा**

**भारतीय विद्यालय: अल माबेला**

## सुविचारः



* यदा वयं सुकार्यं कुर्मः तदा वयं तूष्णीं न भवेम। तत् विषयं सर्वान् प्रति वदामः। यतः तत् कार्यस्य प्रभावं च महत्त्वं अन्यजनाः ज्ञातुं न शक्नुवन्ति।

* यद् यद् भवति तत् शुभाय एव भवति। अतः वयं सर्वं सहामहे जीवनं च अग्रे नयामः।



अंशिका नवमी कक्षा

भारतीय विद्यालयः मस्कत्

# समाजसेवकाः



आरक्षकः सदा सर्वदा नियमस्य पालनं कृत्वा जनानां रक्षणाय प्रयत्नं करोति।

अग्नि शमन कर्मकरः प्रज्वलितः अग्नेः जनान् रक्षति।

कृषिका क्षेत्रं कर्षति। सा पादपान् आरोपयति यैः अस्माकं पर्यावरणं वायु प्रदूषणात् विमुक्तम् भवति।



आनन्द कुमार केन्चनौद्रा  गौरी गोकुल्  अशुतोष् हेमन्त् नाइक्
षष्ठी कक्षा  भारतीय विद्यालयः अल् घुब्रा (अन्तराष्ट्रियः)

## प्रश्नोत्तराणि




१) रामायणकाव्यं केन रचितम् ?

२) पञ्चतन्त्रम् इति कथापुस्तकं केन लिखितम् ?

३) संस्कृतव्याकरणे “अष्टाध्यायी” इति ग्रन्थ: केन रचित: ?

४) संस्कृतनाटकानां पिता इति क: प्रसिद्ध: ?

५) रघुवंशम् इति महाकाव्यं केन कविना रचितम् ?

उत्तराणि:

१) वाल्मीकिना २) विष्णुशर्मणा ३) पाणिनिना ४) महाकवि: भास:

५) महाकवि-कालिदासेन



प्रणव: अनन्त: VII D
भारतीयविद्यालय: दार्सैट्

# परोपकारः पुण्यम्



राकेशः - प्रकाशः उभयोः मेलनं तदा संवादः च।

राकेशः - नमोनमः, मम नामः राकेशः , भवतः नाम किम्......?

प्रकाशः - नमस्कारः, अहं प्रकाशः, कथमस्ति भवान्...?

राकेशः- अहं कुशलिनः अस्मि । भवान्....?



प्रकाशः- अहमपि कुशली एव ।

राकेशः- किं त्वम् आपणात् आगच्छसि....?

इदं आपणम् समीचीनम् वा ।

प्रकाशः - अहम् अद्य प्रथमं वारं गतः।

हे मित्र ! तावत् समीचीनं अपि नास्ति एतत्।

राकेशः- भवतु अहमपि भवतां साहहायं करोमि इत्युक्त्वा

अति बृहद् एकं भाण्डं उट्टीयते।

झटिति राकेशः मार्गे पतति।

प्रकाशः - अरे मित्र किं जातम् इति पृष्ट्वा तं शिश्रूषा केन्द्रं नीयते।

(किञ्चित् समयानन्तरे वैद्यः आगत्य प्रकाशं वदति)

वैद्यः -भवतः समयोचित साहहायेन अस्य प्राणरक्षां अभवत्। भवतासदृश युवकेभ्याणां समक्षे अस्ति राष्ट्रस्य संरक्षणं अपि।

सन्देशम् -परोपकारार्थमिदम् शरीरम्।

तनिष्का गोयल, षष्ठी कक्षा भारतीय विद्यालयः निस्वा

## ।। प्रहेलिकाः ।।



.1 अस्ति नास्ति शिरो नास्ति बहुरस्ति निरङ्गुलिः।

नास्ति पादद्वयं गाढम् अङ्गम् आलिङ्गति स्वयम्।।

.2 कृष्णमुखी न मार्जारी ,द्विजिह्वी न च सर्पणी।

पञ्चभर्त्री न पाञ्चाली , यः जानाति सः पण्डितः।।

.3 विचरति आकाशे न तु वायुयानः

मांसभोजी न मृगाधिराजः।

दूरद्रष्टा न च योगिराजः

कथय कः एषः अति-तीव्रगामी।।



.4 किमिच्छति नरः काश्याम् ?

भूपानां को रणे हितः ?

को वन्द्यः सर्वदेवानाम् ?

दीयताम् एकम् उत्तरम्।।

.5 न तस्यादिः न तस्यान्तः मध्ये यः तस्य तिष्ठति।

तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद।।

उत्तराणि-

१) युतकम्।  २) कलमम्।  ३) श्येनः।  ४) मृत्युञ्जयः।  ५) नयनम्।

सिद्धार्थ गुप्ता षष्ठी कक्षा

भारतीयविद्यालयः निस्वा



## मातृभूमिः

“जननी जन्मभूमिश्च स्वर्गादपि गरीयसी” । मातृभूमिः जन्मतः आरभ्य मृत्युपर्यन्तम् अस्माकं रक्षणं पोषणं च करोति । “माता भूमिः पुत्रोऽहं पृथिव्याः” इति वेदवाक्यम् आस्ते । अतः, मातृभूमिः सर्वैः नरैः वन्दनीया भवति । येन केनापि प्रकारेण मातृभूमेः रक्षणं करणीयम् ।

गोकुल् श्यामकुमार

भारतीय विद्यालयः अलघुब्रा

# चतुरङ्गाक्षर क्रीडा

**(Puzzle Game)**



| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 1 | | | | | 4 | | | | |
| | | 3 | | | | | | | 9 |
| 2 | | | | | | | 5 | | |
| | | | 7 | | 6 | | | | |
| | | | | | | | | 12 | |
| | 8 | | | | | 11 | | 10 | |
| 14 | | | | | | | | | |
| 15 | | | | | 13 | | | | |
| | | 16 | | | | | | | |

**Horizontal**

1.विलोम - सम्मानः

2.समान - पंकजः

3.समान - माता

4.विलोम - प्रतिकूलः

6.पुल्लिंग - मूषिकः

8.विलोम - प्रकाशः

10.समान - स्त्री

13.समान - कोयल

14.समान - गृह

15.समान - नारी

16.समान - मुखम्

**Vertical**

1.समान - बहु

2.समान - कूर्मः

3. समान - वारि

4.समान - तुरंग

5.समान - विलापः

7.समान - अभूषणम्

9.समान - मत्स्यः

11.समान - चन्द्रः

12.समान - गणशः

13.समान - मधुसूधनः

तनिष्का गुजरात्ति, सप्तमी कक्षा
भारतीय विद्यालयः निस्वा



# जयतु संस्कृतम् जयतु भारतम्

नमांसि, कस्य समाजस्य भविष्यम् उज्वलम् अस्ति इति पृष्टे सति कश्चन ज्येष्ठ: उक्तवान् “यस्य समाजस्य युवकानां नेत्रयो: पुरत: स्वप्ना: सन्ति तस्य समाजस्य भविष्यम् उज्वलम् अस्ति” । तथा संस्कृतजगति ये युवान: सन्ति, छात्रा: सन्ति ते नवान् स्वप्नान् संस्कृतविकासकान्, राष्ट्रोद्धारकान् द्रष्टुं प्रेरणीया: । तेषु आकाङ्क्षा:, महत्वाकाङ्क्षा: एव उत्पादनीया:। व्यक्तिगता महत्वाकाङ्क्षा न, अपि तु संस्कृतगतमहत्वाकाङ्क्षा। समर्थरामदास: यदा बाल: आसीत् तदा स: कस्मिश्चित् प्रकोष्ठे उपविश्य दीर्घकालं यावत् चिन्तयति स्म। तदा कश्चन तं पृष्टवान् तत्र किं करोति इति। स: उक्तवान् " चिन्ता करितो विश्वाची" (अहं विश्वस्य चिन्तां करोमि) इति। मित्राणि, तथा अस्मदीया: अपि, वैश्विकम् एव चिन्तनं कुर्यु:, हिमालयोन्नतम् एव स्वप्नं पश्येयु:, इतरै: अनाक्रान्तं एव मार्गं क्रान्तुम् उत्सहेरन्। जयतु संस्कृतम् जयतु भारतम् ।





प्रणव जोइस् अष्टमी कक्षा

भारतीय विद्यालय अल वादी अल कबीर



## वार्तालाप: - मित्राणि

| | |
|---|---|
| मित्राणि किं कुर्वन्ति ? | मित्राणि कासारे क्रीडन्ति । |
| मित्रं किं यच्छति ? | मित्रं स्वमित्रेभ्यः भोजनं यच्छति । |
| मीनाः किं कुर्वन्ति ? | मीनाः जले तरन्ति । |
| मित्रं कुत्र अस्ति ? | मित्रं शिलायां उपविष्टः अस्ति । |



मोनिका - VI E

भारतीय विद्यालयः दार्सैत



## मम देशः





मम देशस्य नाम भारतम्। मम देशे नवविंशतिः राज्यानि सन्ति। दिल्ली-नगरं भारतस्य राजधानी अस्ति। मम देशे विविध-धर्ममतावलंबिनः स्नेहेन प्रेम्णा च निवसन्ति। अत्र जनानां विविधं भोजनं विविधाः च भाषाः। विविधाः वेशभूषा विविधाः संप्रदायाः च देशस्य विशेषता अस्ति। केचन उत्सवाः अपि विभिन्नाः सन्ति। भारतस्य उत्तरार्धे होली- बैसाखी-रक्षाबन्धनं - दीपावली इत्यादयः उत्सवाः तथा दक्षिणार्धे ओणम- पोंगल- युगादि- विशु इत्यादयः उत्सवाः जनाः हर्षेण आचरन्ति। भारतम् अस्माकं जन्मभूमिः । वयम् एकं राष्ट्रध्वजं नमामः एकं च राष्ट्रगीतं गायामः। अस्माकं देशे राष्ट्रियपर्व स्वतंत्रतादिवसं गणतंत्रदिनं च सर्वे उत्साहेन आचरन्ति। भारते यद्यपि विविधाः प्रादेशिकभाषाः सन्ति तथापि सर्वासां भाषाणां जननी एका एव सा संस्कृतभाषा।संस्कृतभाषा भारतस्य गौरवम् अस्ति।मम देशः मह्यम् अतीव रोचते।




जेसन पिंटो सप्तमी कक्षा

भारातीय विद्यालयः अल् माबेला

## पिपीलिकायाः कथा

एकस्मिन् वने एका पिपीलिका अस्ति । तस्याः पुत्रद्वयं च स्तः । कदाचित् कापि परिश्रमशीलः भवति । अन्यः अतीव अलसः च भवति । एकदा माता पिपीलिका अलसपुत्रं आहूय वदति “पुत्र अलसेन विना कार्यं करोतु नो चेत् समीपकाले भवतः कष्टं भविष्यति इति” सः मातुः वचनम् न श्रुणोति, खेलनाय गतवान् । अम्बा पिपीलिका एवं उक्त्वा मृतवती । एतत् श्रुत्वा पुत्रस्य दुःखं जातम् । तस्य भोजनविषये अपि कष्टम् अभवत् । तदा सः चिन्तितवान “ इतःपरं अलसतया किमपि नास्ति । परिश्रमं कृत्वा भोजनं प्राप्तव्यम् “ इति । सः अलसतां उपेक्ष्य सम्यक् उपजीवनं कृतवान् ।



श्रव्या दीपक् - षष्ठी कक्षा

भारतीय विद्यालयः अल् सीब्



## मातापितरौ सेवा

* न जानामि कथम् जनाः अश्ममूर्तिः गृहे स्थापयन्ति............

परं मातपितरौ ते किञ्चित् अपि स्थानं तेषां हृदये

दातुम् न शक्यते।



* यदैव भवान् मातापितृभ्यां सह तिष्ठेव सर्वदा

परमात्मायाः धन्यवादं कुरू !

केञ्चित् अनाथजनाः एतत् अवसरं

प्राप्तुम् न शक्यते।

संस्कृत छात्रा

भारतीय विद्यालयः मस्कत्

## मित्राणि

मोनिषा - एतानि कानि सन्ति ?

प्रियान्षि - एतानि चित्राणि सन्ति ।

मोनिषा - बालाः किं कुर्वन्ति ?

प्रियान्षि - बालाः खेलन्ति ।

मोनिषा - त्वं किं पश्यसि ?

प्रियान्षि - अहम् एतान् वृक्षान् पश्यामि ।

मोनिषा - खगाः कुत्र उत्पतन्ति ?

प्रियान्षि - हिमालयस्य उपरि खगाः उत्पतन्ति ।

मोनिषा, प्रियान्षि च - VI E

भारतीय विद्यालयः दार्सैत







## साधव: सर्वे सफला: भवन्ति



यदा प्रातःकालः आगच्छति

तदा अस्माकं नेत्राणि उत्घातयन्ति ।



उत्तम विचारान् मनसि

आगच्छन्ति

मनः पुष्पम् इव भवति ॥

अलसस्य नरस्य विद्या नास्ति

विद्या विना कोऽपि सफ़ल: न भवति ।

अतः सर्वे छात्राः सम्यक् पठन्तु जनान्

सेवां च कुर्वन्तु राष्ट्रं उन्नतिं च नयन्तु ॥

आद्रिका राहुत् - षष्ठी कक्षा

भारतीय विद्यालयः अल् सीब्

## आचार्यदेवो भव



किम् अस्ति तत् पदम् ? यः लभते इह सम्मानम्।।

किम् अस्ति तत् पदम् ? यः करोति देशानाम् निर्माणम्।।

किम् अस्ति तत् पदम् ? यम् कुर्वन्ति सर्वे प्रणामम्।।

किम् अस्ति तत् पदम् यस्य छायायाः प्राप्तम् ज्ञानम्।।

मृत्तिका (Mrittika)

सप्तमी कक्षा

भारतीय विद्यालय: निस्वा



# मम विद्यालय:




मम विद्यालयस्य नाम भारतीयविद्यालय: दार्सैट् अस्ति | मम गृहस्य समीपे एव मम विद्यालय: अस्ति | अयं विद्यालय: अति विशाल: अस्ति | मम विद्यालय: भव्य: सुन्दर: च अस्ति | मम अध्यापका: श्रेष्ठा: सन्ति | ते छात्रेभ्य: विविधान् विषयान् पाठयन्ति | मम विद्यालय: मह्यम् अतीव रोचते ||



वरुण: एस् नायर, VII D

भारतीयविद्यालय: दार्सैट्

# मम प्रिय: भारतीय नेता - महात्मा गान्धी

मम प्रिय नेता राष्ट्रपिता मोहन्दास करंचन्द महात्मा गान्धी अस्ति ।

तस्य जन्मस्थानं पोरबन्दर् इति गुजरात प्रदेशे अस्ति ।

सत्यभाषणं तस्य जीवन्दर्शनं आसीत् । तस्य प्रयत्नेन भारतदेशं स्वतन्त्रतां प्राप्नोत् । सः अहिन्सा मार्ग बोधयति ।



अपर्णा प्रवीन् पञ्चमी कक्षा
भारतीय विद्यालयः अलघुब्रा



## धन्या मम माता





एषा मम धन्या माता,
या मां प्रातः शय्यातः।
जागरयति सम्भोधनतः
हरस्मिरणं या कारयति।
आलस्यं मम नाशयति।। एषा मम......।
कुरु दत्तं ग्रहकार्यम् त्वं,
कुरु सुत ! पाठाभ्यासं त्वम्।
आदेश ददती एवम्
योजयते कार्ये नित्यम्।। एषा मम......।

मृत्तिका, सप्तमी कक्षा
भारतीय विद्यालय: निस्वा

## चरक:

अयं भारतीय-शल्य-चिकित्साया: प्रवर्तक: अस्ति | अयं काल: क्रिस्तो: पूर्वं तृतीय शताब्द: (3 BC) | अयं तक्षशिला इति प्रथम संस्कृत विश्वविद्यालये छात्र: आसीत् | अस्य कृति: "चरक संहिता" अस्ति | अस्मिन् ग्रन्थे विविध-शल्य-चिकित्साम् अधिकृत्य वर्णनं करोति | अयं शल्य चिकित्सायाम् अभूत पूर्वा: सिद्धी: आप्नोत् | एवं शुश्रुत इति चिकित्सक: अपि भारते सुप्रसिध्द:: आसीत् | अस्य चिकित्सा पद्धति: एव आयुर्वेद: इति जगति प्रसिद्ध: ||





भारती श्रीधर:, सप्तमी कक्षा
भारतीयविद्यालय: दार्सैट्

## महाभारतम्

संस्कृताभाषायाः विशालतमः ग्रन्थः “महाभारतं” । अयं इतिहास-महर्षि-वेदव्यासेन लिखितः। अस्मिन् ग्रन्थे “लक्षा” श्लोकाः वर्तन्ते, तेनायं “शतसाहस्री” इत्यपि कथ्यते



। विशालोऽपि ग्रन्थः अष्टादश पर्वसु विभक्तः । महाभारतस्य मुलकथायं यद्यपि पाण्डव कौरवयोः विरोधादि विषयाः वर्णिताः भवन्ति तथापि बहुभिः उपकथाभिः अमूल्याः नीतयः अपि प्रतिपादिताः सन्ति । “विदुरनीतिः” द्वारा राजनीतयः “यक्ष-युधिष्ठिर संवादः” द्वारा धार्मिकविषयाः “भगवद्गीता” द्वारा वेदान्तविषयाः च सरलतया उपदिष्टाः भवन्ति ।




कबीर सेति च गौतं सिद्धार्थ, षष्ठी कक्षा
भारतीय विद्यालयः घुब्रा

## मम प्रियं पुस्तकम् - हैरी पाटर

मम प्रियं पुस्तकम् अस्ति हैरी पाटर | हैरी पाटर कथायाः रचयिता – जे.के.रोलिङ् अस्ति | अस्यां कथायां सप्त भागाः सन्ति | अस्यां कथायां “हैरी पाटर, हिरमैनी ग्रानजर, चा रौन वीज्ली इत्यादयः कथापात्राणि सन्ति | जे.के.रोलिङ् एका श्रेष्ठा रचयिता अस्ति | अस्यां कथायां सा नूतनस्य लोकस्य सृष्टिं करोति | मह्यं हैरी पाटर पुस्तकानि अतीव रोचन्ते ||





मनस्वी एस्. प्रवीणः, सप्तमी कक्षा
भारतीयविद्यालयः दार्सैट्

# कालिदासः

कविशिरोमणिः कविकुलगुरुः कालिदासः सर्वश्रेष्ठः इति उच्यते । कालिदासः प्राचीनकालिकः राष्ट्रकविः अपि । सः मालविकाग्निमित्रम्, विक्रमोर्वशीयम्,



अभिज्ञानशाकुन्तलम् इति नाटकत्रयं रघुवंशं, कुमारसंभवम्, इति महाकाव्यद्वयं मेघदूतं इति एकं खण्डकाव्यं ऋतुसंहारम् इति गीतिकाव्यम् एकञ्च अरचयत् । महाराज्ञः विक्रमादित्यस्य राजसभायां अयं प्रसिद्धः कविः आसीत् इति सर्वैः स्वीक्रियते ॥

पुरा कवीनां गणना प्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः ।



अद्यापि तत्तुल्य कवेरभावात् अनामिका सार्थवती बभूव ॥

काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।

तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥

प्रतिमाश्रीः अष्टमी कक्षा

भारतीयविद्यालयः दार्सैट्

# सीता



सीता मिथिला देशस्य पुत्री अस्ति । सीता लक्ष्मी देव्याः अवतारः अस्ति । सा अयोध्यायाः श्रीरामस्य पत्नी अस्ति । तस्याः लवः कुशः इति द्वौ पुत्रौ स्तः । तस्याः पिता जनकमहराजः, माता च सुनयना अस्ति



।नन्दना कक्षा - अष्टमी कक्षा

भारतीय विद्यालयः घुब्रा

## संस्कृतव्याकरणपिता - पाणिनिः

पाणिनिः संस्कृत व्याकरणस्य पिता अस्ति | अस्य कृतिः “अष्टाध्यायी” इति जगत् प्रसिद्धम् | पाणिनीय व्याकरणम् इति अस्य कृतिः नवमं व्याकरणम् अस्ति |

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् |
सारस्वतं चापिशालं शाकलं पाणिनीयकम् ||

इति | भगवान् पाणिनिः अष्टाध्यायी इति ग्रन्थं रचितवान् | चतुःसहस्रं व्याकरण सूत्राणि अनेन रचितानि; संस्कृत भाषां च शुद्धं अकरोत् | सर्वे संस्कृत छात्राः अवश्यं पुस्तकमिदं पठन्ति ||

तव्वा विहान्, सप्तमी कक्षा
भारतीयविद्यालयः दार्सैट्





## जटायुः



रामयणकथायां जटायुः अग्निदेवस्य पुत्रः आसीत् ।
एकदा रावणः सीताम् अपहृत्य लङ्कां गच्छति । तदा
जटायुः रावणात् सीतां रक्षितुं प्रयत्नं करोति ।
रावणेन सः जटायुः युद्धं करोति ।
परन्तु सः जटायुः रावणेन मारितः ।
जटायुः एकः धर्मिष्टः च धीरः पक्षी अस्ति ।



लक्ष्मी राजीव अष्टमी कक्षा
भारतीय विद्यालयः अलघुब्रा



## भरतमुनि:



अयं नाट्य नाटकानां प्रवर्तक: | अयं काल: क्रिस्तो: पूर्वं द्वितीय शताब्दं इति वदन्ति | अनेन नाट्यशास्त्रम् इति अद्भुतं काव्यं रचितम् | अस्मिन् अयं भारतनाट्यस्य लक्षणानि, नाटकानां लक्षणानि च वर्णयति | भरतनाट्यम् इति नाट्यशैली अनेन एव प्रवर्तिता | अस्मिन् ग्रन्थे दशविध नाटकानि, गीतं, विविधानि संगीत उपकरणानि वर्णितानि | अपि च नाट्य नाटक प्रदर्शने रस, भाव, ताल, लयादीनां विवरणम् अनेन कृतम् ||

विविधा सेन्दिल्नाथन्, सप्तमी कक्षा
भारतीयविद्यालय: दार्सैट्



## गङ्गा नदी

भारतवर्षे अनेका: नद्य: सन्ति। तासु गङ्गा नदी अतीव पवित्रा नदी अस्ति। गङ्गा नदी हिमालयात् आगच्छति। हिमालये अनेके तीर्था: सन्ति। गङ्गा नद्या: तीरे हरिद्वार:, प्रयाग:, वाराणसी च प्रसिद्धा: तीर्था: सन्ति। पाटलिपुरम् अपि गंगातीरे अस्ति। प्रयागे गङ्गा–यमुन्यो: संगम: अस्ति। गङ्गायां पोता: नौका: च चलन्ति। नौकायां जना: अल्पा: एव तिष्ठन्ति। पोतेषु जना: पदार्थान् नयन्ति। प्राचीनकाले पोता: एव यात्रा साधनानि आसन्। अधुना यन्त्रचालिता:पोता: नौका: च चलन्ति।



अनीश कुमार अष्टमी कक्षा
भारतीय विद्यालय: सोहार

# भासः

पुस्तकानि अस्माकं मित्राणि सन्ति | तानि मम प्रियाणि सन्ति | अस्माकं गृहे लघु पुस्तकालय: अस्ति | तस्मिन् पुस्तकालये बहूनि संस्कृतपुस्तकानि सन्ति | तेषु वेदा:, उपनिषद:, रामायणं, महाभारतं, कथा:, कविता: इति बहव: सन्ति |



तेषु कालिदासस्य महाकाव्यानि उत्तमानि सन्ति | अपि च भासनाटकानि अपि सन्ति | भास: संस्कृत नाटकानां पिता इति वदन्ति | अस्य काल: क्रिस्तो: पूर्वं (1st BC) इति वदन्ति | त्रयोदश (13) नाटकानि अनेन रचितानि | स्वप्नावासवदत्तं, कर्णभारं इत्यादि नाटकानि अनेन रचितानि सन्ति |

यश: - सप्तमी कक्षा
भारतीयविद्यालय: दार्सैट्





## वृक्षा: - अस्माकं मित्राणि



वृक्षः मम मित्रम् अस्ति । वृक्षः हरितः अस्ति । वृक्षे फलानि सन्ति । पक्षिणः वसन्ति । वृक्षात् पत्राणि पतन्ति । वृक्षः व्रष्टिं आनयति । सः अस्माकं प्राणवायुं ददाति । वृक्षस्य शाखाः दीर्घाः भवन्ति । वृक्षः फलानि पुष्पाणि छायां च ददाति । वृक्षस्य उपयोगेन वयं आसनं, उत्पीठिकां, पात्राणि, वातायनं, द्वारं सर्व कुर्मः । वृक्षस्य रक्षणम् अस्माकं कर्तव्यम् ।

के.के. विनयसुदर्शनः, पञ्चमी कक्षा
भारतीय विद्यालयः घुब्रा



## पुष्पाणि



पुष्पाणि अथवा कुसुमानि वृक्षाणां लतानां च वर्धयन्ति । लोके जनाः पुष्पाणि इच्छन्ति । पुष्पाणां विविधाः वर्णाः भवन्ति । रक्तः, केसरः, पाटलः, पीतः, नीलः, श्वेतः, नीललोहितः च पुष्पाणां वर्णाः भवन्ति । पुष्पाणि दृष्ट्वा जनाः आकृष्टाः भवन्ति । जनाः लताः, वृक्षान् च ग्रह-उद्यानेषु आरोपयन्ति । भक्ताः पुष्पाणि देवेभ्यः अर्प्यन्ति । ललनाः पुष्पाणि स्वकेशेषु धारयन्ति । गृहिण्यः पुष्पाणि पुष्पाधानीषु स्थापयित्वा ग्रहस्य शोभां वर्धयन्ति । भ्रमराः चित्रपतन्गाः च पुष्पेषु इतस्ततः भ्रमन्ति । कमलं पुष्पाणां राजा अस्ति । महयम् पुष्पं बहु रोचते ।



कृष्णप्रिया सप्तमी कक्षा

भारतीय विद्यालयः अल् माबेला

## संस्कृताध्यापकः

अहं संस्कृत अध्यापकः अस्मि । भाषासु मुख्या मधुरा विद्यया गीर्वाणभारती। तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम् । अतः अहं एकं सुभाषितं कथयामि।



उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।

**पुस्तकस्था तु या विद्या परहस्तगतं धनम् ।**

**कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥**

अभिनव् गणेश् कुमार् 6-वि

भारतीय विद्यालयः अल् घुब्रा (अन्ताराष्ट्रियः)



## वृक्षा: - अमूल्यं सम्पत्



अस्माकं जीवनं वृक्षस्य अमूल्यम् स्थानं अस्ति । वृक्षस्य अनेके उपयोगाः सन्ति । वृक्षः अस्माकं क्रते प्राणवायुं फलं पुष्पं च ददाति । वृक्षं विना मनुष्यस्य जीवनं शून्यं भवति । वृक्षः अन्यस्य छायां करोति परन्तु स्वयं आतपे तिष्ठति ।

लक्ष्मी राजीव्:, अष्टमी कक्षा

भारतीय विद्यालयः घुब्रा



## तरव:

तरु: उन्नत: पादप: अस्ति | तरूणां रूक्षं काष्टकमस्ति | अनेके तरव: फलानि ददति | अनेकेषां वृक्षाणां संघ: अरण्यम् इति कथ्यते | तरूणां पत्राणि प्राणवायुं उत्सृजन्ति | तरव: जनेभ्य: छायां यच्छन्ति | उक्तञ्च -



छायामन्यस्य कुर्वन्ति
तिष्ठन्ति स्वयमातपे |
फलान्यापि परार्थाय
वृक्षा: सत्पुरुषा: इव ॥



सहाना, अष्टमी कक्षा

भारतीयविद्यालय: दार्सैट्

## मम प्रिय: खग: - मयूर:

मम प्रिय: खग: मयूर: अस्ति | मयूर: अतीव सुन्दर: खग: अस्ति | मयूर: वर्णमय: खग: महान् च अस्ति | तस्य ग्रीवा नीलवर्णे अस्ति | पिच्छानि सुन्दरवर्णेषु सन्ति | मयूरा: राजस्थाने, तमिलनाडु इत्यादि प्रदेशेषु भवन्ति | अयं साधु: खग:, वनेषु वासं कृत्वा धान्यानि, सर्पा: इति सर्वं खादति | अयं खग: भारतदेशस्य राष्ट्रपक्षी ||





ए.एस्. तनीषा, सप्तमी कक्षा
भारतीयविद्यालय: दार्सैट

## नीलग्रहः

'जलम् एव जीवनम्' इति उक्त्यानुसारं अस्माकम् जीवने जलस्य आवश्यकता वर्तते । पृथिव्यः जीवानां कृते आवश्यकं तत्वं जलम् अस्ति एतत् अस्माकम् सौभाग्यम् अस्ति यत् पृथिवी जलीय ग्रहः अस्ति। जलं सौरमण्डले दुर्लभं वर्तते। अन्यत्र कुत्रापि जलं नास्ति अतः पृथिवी नीलग्रहः इति उच्यते !!!





श्वेता सुरेश नवमी कक्षा
भारतीय विद्यालयः मस्कत्

# सुवचनानि



यथा ह्यकेन चक्रेण न रथस्य गतिर्भवेत् ।

एवं पुरुषकारेण विना दैवं न सिद्धयति। ।



हिंदी अर्थ- जैसे एक पहिए से रथ की गति नहीं होती (रथ नहीं चलता),

उसी प्रकार पुरूषार्थ बिना भाग्य भी सिद्ध नहीं होता।

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्।

अहार्यत्वादनर्घत्वात् अक्षयत्वाच्च सर्वदा। ।

हिंदी अर्थ- सदैव न चुराए जा सकने के कारण, पवित्र होने के कारण और नष्ट न होने के

कारण विदया को सब द्रव्यों में उत्तम द्रव्य कहते हैं।



वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।

एकश्चन्द्रस्तमो हन्ति न च तारागणैरपि। ।

हिंदी अर्थ- एक गुणी पुत्र अच्छा है,सैकड़ों (अधिक) मूर्ख पुत्रों से।

जैसे एक चंद्रमा अँधकार को नष्ट कर देता है परंतु तारों का समूह नहीं।

आयु: कर्म च वित्तं च विद्या निधनमेव च।

पंचतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिन:। ।

हिंदी अर्थ- माँ के गर्भ में स्थित देहधारी के लिए ये पाँच आयु, कर्म,

धन, विदया और मृत्यु लिख दी जाती है।



योगेश सप्तमी कक्षा
भारतीय विद्यालयः सोहार

# मम परिचयः

तव नाम किम् ? मम नाम वृद्धिः अस्ति |

तव परिवारे कति सदस्याः सन्ति ?मम परिवारे चत्वारः सदस्याः सन्ति |

तव जनकस्य नाम किम् ? मम जनकस्य नाम श्री.हरिनाथः अस्ति |

तव जनन्याः नाम किम् ? मम जनन्याः नाम मनोहरी अस्ति |

तव भगिन्याः नाम किम् ? मम भगिन्याः नाम वृष्वी अस्ति |

तव भगिनी कस्मिन् विद्यालये पठति ? अहं मम भगिनी च



भारतीयविद्यालयः दार्सैट् विद्यालये पठावः |

तव भगिनी कति वर्षीया अस्ति ?

मम भगिनी पञ्च वर्षीया अस्ति |

तव जनकः कः अस्ति ?

मम जनकः अभियन्ता अस्ति |

तव जननी का अस्ति ? मम जननी गृहीणी अस्ति |

मम परिवारः मह्यम् अतीव रोचते |



वृद्धिः अडप्पा, सप्तमी कक्षा

भारतीय विद्यालयः दार्सैट्



# सङ्गणकानि



इदानीं सङ्गणकस्य युगम् अस्ति | सर्वत्र सङ्गणकस्य प्रयोग: वर्तते | कार्यालयेषु, आपणेषु, अनुसान्धानकेन्द्रेषु, व्यापारकेन्द्रेषु उद्योगालयेषु इति सर्वत्र सङ्गणकस्य उपयोग: भवति | विद्यालयेषु छात्रा: सङ्गणकविज्ञानम् अवश्यमेव पठन्ति | आधुनिक जीवने संगणकं विना जीवनम् असंभवम् इति ज्ञायते | सञ्चारशाधनानां प्रगतौ सङ्गणकस्य योगदानम् अत्यधिकं वर्तते | सङ्गणकस्य सहायेन चलचित्राणि अपि कल्पयन्ति | सर्वेषु स्थलेषु तेषां विषयाणां संग्रहणे पूर्वं कर्कदानाम् उपयोग: एव आसीत् | इदानीं सङ्गणकस्य उपयोगेन कर्कदानाम् उपयोग: दूरीकृत: | संगनकानां माध्यमेन सर्वमेव कर्तुं शक्यते |

श्रीवत्सराज: नवमी कक्षा

भारतीय विद्यालय: दार्सैट्

**<u>निष्कर्ष:</u>**

अकिञ्चनस्य दान्तस्य शान्तस्य समचेतस: |
मया संतुष्टमानस: सर्वा: सुखमया दिशा: ||

**The whole world is full of happiness to a humble one, whose passions are curbed, who is self-controlled, even-tempered and who is self-controlled, even-tempered and who is always satisfied.**

**प्रियच्छात्रा: !**

**ज्ञायते च ज्ञानस्य फलं संतोष एव | ज्ञानस्य फलं सद्गुणा अपि | संतोष एव सुखस्य फलम् | सुखमेव जीवनस्य लक्ष्यम् | लक्ष्यं विना जीवनम् नरकायते | सर्वे एव सुखं वाञ्छन्ति | सुखमेव जीवनं रसमयं करोति | एवं ज्ञात्वा ज्ञानप्राप्तये यत्नवन्तो भवेयु: इति आशास्य विरमामि ||**

indian schools,
sultanate of oman

# Sanskrit eMagazine

Published by :

**Board of Directors**

**Indian Schools in Oman**

**Sultanate of Oman**

For Private Circulation only